तेषां प्रचरणान्यासुरायणीया वातायनीया प्राञ्जला ऋग्वर्णभेदा प्राचीनयोग्या ज्ञानयोग्या राणायनीयाश्चेति। तत्र राणायनीयानां नव भेदा भवन्ति। राणायनीयाः। शाट्यायनीयाः। शाठायनीयाः इति शाख्यमुग्राः इति च पाठः। सात्वलाः। सात्यमुद्गला इति वा पाठः। मौद्गलाः। इति तु भाष्ये नास्ति। खल्वलाः। महाखल्वलाः। लाङ्गलाः। कौथुमाः। गौतमाः। जैमिनीयाश्चेति। तेषामध्ययनमष्टौ सामसहस्राणि सामानि च चतुर्दश चाष्टौ शतानि। दशेति दशसप्त वालखिल्याः ससुपर्णप्रैष्यः। क्वचित् पुस्तके नवतिदशतिवालखिल्यः ससुपर्णप्रैष्यः इति च पाठः। एतत् सामगणं स्मृतम्॥ * ॥ अथर्व्ववेदस्य नव भेदा भवन्ति। पैप्पलाः। दान्ताः। प्रदान्ताः। स्नाताः। स्नौता इति च पाठः। शौल्काः। ब्रह्मदावलाः। शौनकी। देविदर्शती। चरणविद्याश्चेति। दान्ता प्रदान्ता स्नौता ब्रह्मदीपशौ वेदशौ इति भाष्ये नामान्तरम्। तेषामध्ययनं पञ्च कल्पानि भवन्ति। नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिता शान्तिकल्पश्चेति। सर्व्वेषामेव वेदानामुपवेदा भवन्ति। ऋग्वेदस्यायुर्व्वेदः। यजुर्व्वेदस्य धनुर्व्वेद उपवेदः। सामवेदस्य गान्धर्व्ववेद उपवेदः। अथर्व्ववेदस्य शस्त्रशास्त्राणि भवन्ति॥ * ॥ (अथर्व्ववेदस्य तन्त्रशास्त्राणीति सन्तु मन्यते। तथा च शुक्रनीतौ। ४। १। २७।
"ऋग्यजुःसामचाथर्व्वा वेदा आयुर्धनुःक्रमात्।
गान्धर्व्वश्चैव तन्त्राणि उपवेदाः प्रकीर्त्तिताः॥")
ऋग्वेदस्यात्रेयगोत्रं ब्रह्मदैवत्यं गायत्रं छन्दः। ऋग्वेदो रक्तवर्णः पद्मपत्रायताक्षः सुविभक्तग्रीवः कुञ्चितकेशः श्मश्रुश्वेतवर्णः स्थिरतिसंयुतः॥ * ॥ यजुर्व्वेदस्य भारद्वाजगोत्रं रुद्रदैवतं त्रैष्टुभं छन्दः। यजुर्व्वेदः कृशो दीर्घः कपाली ताम्रवर्णः काञ्चननयनः आदित्यवर्णो वर्णेन पञ्चारत्निमात्रः॥ * ॥ सामवेदस्य काश्यपगोत्रं विष्णुदैवत्यं जागतं छन्दः। सामवेदो नित्यस्रग्वी शुचिः शुचौ वासी शुचिवासाः इति च पाठः। शमी इत्यपि पाठः। दान्तो चर्म्मी दण्डी काञ्चननयनः आदित्यवर्णो वर्णेन षडरत्निमात्रः॥ * ॥ अथर्व्ववेदस्य वैखानसगोत्रं रुद्रदैवत्यं आनुष्टुभं छन्दः। अथर्व्ववेदस्तीक्ष्णश्चण्डः क्षयः कामरूपी क्षुद्रकर्म्मा स एव साध्याः क्षुद्रकर्म्मस्वेव साध्या इति वा पाठः। सविग्रहाः सकलहाः मूर्द्धि गालवः सदानष्ट्रः परस्त्रियाम्यश्चेति नवरत्निमात्रः। ग्रन्थान्तरे विश्वात्मा विश्वकर्म्मा स्वशाखाध्यायी। शान्तो महानीलोत्पलवर्णो वर्णेन दशरत्निमात्र इति च पाठः॥ * ॥ अथ ध्यानम्।

"ध्यायामि त्वां पद्मपत्रायताक्षं
कुञ्चितकेशं ब्रह्मदैवत्यमाद्यम्।
गायत्रं ऋग्वेदमात्रेयगोत्रं
रक्तवर्णं श्मश्रुलोमप्रमाणम्।
वन्दे रौद्रं त्रैष्टुभं ताम्रवर्णं
भारद्वाजं रक्तनेत्रं कृशाङ्गम्।
यजुर्व्वेदं दीर्घमादित्यवर्णं
कापालिनं पञ्च चारत्निमात्रम्॥" * ॥

य इदं दैवतं रूपं गोत्रप्रमाणं छन्दोवर्णं वर्णयति स विद्यां लभते स विद्यां लभते। जन्म जन्म वेदपारो भवति अव्रतो व्रती भवति अप्रयतः प्रयतो भवति अब्रह्मचारी ब्रह्मचारी भवति जातिस्मरो जायते॥ * ॥

"य इदं चरणव्यूहं पर्व्वसु श्रावयेद्द्विजः।
धौतपाप्मा शुचिर्विप्रो ब्रह्मभूयाय कल्पते॥
य इदं चरणव्यूहं श्राद्धकाले सदा पठेत्।
अक्षयमभवत् श्राद्धं पितॄणामुपतिष्ठते॥
योऽधीते चरणव्यूहं स विप्रः पङ्क्तिपावनः।
पावयत्यखिलान् पूर्व्वान् पुरुषान् सप्त सप्त च॥
य इमा विपुला देवा अमृतत्वञ्च गच्छति।
लोकातीतं महाशान्तं अमृतत्वञ्च गच्छति॥"

गच्छध्वं नम इत्याह भगवान् व्यासः पाराशरीयो व्यासः पाराशरीयः। इति व्यासरचितं चरणव्यूहं समाप्तम्॥ (धनम्। यथा, ऋग्वेदे। ८। ७३। १।
"अग्निं रथं न वेद्यम्।"
"वेदं वेदो धनम् धनहितम्।" इति तद्भाष्ये सायणः॥ चतुःसंख्यावाचकः। यथा, साहित्यदर्पणे। ४। २६४।
"तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः।
सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया।
वेदखाग्निशराः शुद्धैरिषुबाणाग्निसायकाः॥"
दर्भमुष्टिः। यथा, मनुः। ४। ३६।
"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम्।
यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले॥")

वेदगर्भः, पुं, (वेदा गर्भे अन्तरे यस्य।) ब्रह्मा। (यथा, भागवते। २। ४। २४।
"एतदेवात्मभू राजन् नारदाय विपृच्छते।
वेदगर्भोऽभ्यधात् साक्षाद्यदाह हरिरात्मनः॥")
ब्राह्मणः। इति हेमचन्द्रः॥

वेदगुप्तिः, स्त्री, (वेदानां गुप्तिः।) ब्राह्मणादिकर्त्तृकवेदरक्षा। इति केचित्॥

वेदनं, वेदना, } क्ली, स्त्री, (विद् + ल्युट्। पक्षे। "घट्टिवन्दिविदिभ्य उपसंख्यानम्।" ३। ३। १०७। इत्यस्य वार्त्तिकोक्त्या युच्।) अनुभवः। तत्पर्य्यायः। संवेदः २। इत्यमरः॥ ज्ञानम्। दुःखम्। इति मेदिनी॥ विवाहः। यथा,—
"पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि॥
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने॥"
इति मानवे ३ अध्यायः॥ * ॥
पाणौति। समानजातीयासु उह्यमानासु हस्तग्रहणलक्षणः संस्कारो गृह्यादिशास्त्रेण विधीयते। विजातीयासु पुनरुह्यमानासु विवाहकर्म्मणि पाणिग्रहणस्थाने अयमनन्तरश्लोके वक्ष्यमाणो विधिर्ज्ञेयः। शर इति। क्षत्रियया पाणिग्रहणस्थाने ब्राह्मणविवाहे ब्राह्मणहस्तपरिगृहीतकाण्डैकदेशो ग्राह्यः। वैश्यया ब्राह्मणक्षत्रियविवाहे ब्राह्मणक्षत्रियविधृतप्रतोदैकदेशो ग्राह्यः। शूद्रया पुनर्द्विजातित्रयविवाहे प्रावृतवसनदशा ग्राह्या। इति कुल्लूकभट्टः॥

वेदनिन्दकः, पुं, (वेदं निन्दतीति। निन्द + ण्वुल्।) नास्तिकः। इति जटाधरः॥ (यथा, यमः। ३०।
"दुर्भगो हि तथा षण्डः पापकृद्वेदनिन्दकः॥")
बुद्धश्च॥

वेदपारगः, त्रि, (वेदस्य पारं गच्छतीति। गम + डः।) वेदवेत्ता। ब्रह्मज्ञानी। यथा,—
"चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे।
येऽभिजाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥"
इति श्राद्धतत्त्वे पितृगाथा॥

वेदमाता, [ऋ] स्त्री, (वेदानां माता।) गायत्री। यथा,—
"योऽधीतेऽहन्यहन्येतां सावित्रीं वेदमातरम्।
विज्ञायार्थं ब्रह्मचारी स याति परमां गतिम्॥
गायत्रीं वेदजननीं गायत्रीं लोकपावनीम्।
न गायत्र्याः परं जप्यं एतद्विज्ञाय मुच्यते॥"
इति कौर्म्मे उपविभागे १३ अध्यायः॥ * ॥
दुर्गा। यथा,—
"ब्रह्मिष्ठा वेदमातृत्वाद्गायत्री चरणायजा।
वेदेषु चरते यत्नात्तेन सा ब्रह्मचारिणी॥"
इति देवीपुराणे ४५ अध्यायः॥

वेदवती, स्त्री, (वेदं ज्ञानमस्त्यस्या इति। वेद + मतुप्। मस्य वः। स्त्रियां ङीप्।) कुशध्वजराजकन्या। सा जन्मान्तरे सीता। यथा,
वह्निरुवाच।
"त्वं गच्छ तपसे देवि! पुष्करञ्च सुपुण्यदम्।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यति॥
सा च तद्वचनं श्रुत्वा प्रतप्य पुष्करे तपः।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीर्बभूव ह॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा।
कामिनी पाण्डवानाञ्च द्रौपदी द्रुपदात्मजा॥
कृते युगे वेदवती कुशध्वजसुता शुभा।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा।
त्रिहायणीति सा प्रोक्ता विद्यमाना युगत्रये॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः॥
(पारियात्रपर्व्वतस्थनदीविशेषः। यथा, मार्कण्डेये। ५७। १८।
"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च॥")

वेदवदनं, क्ली, (वेदानां वदनमिव।) व्याकरणम्। यथा,—
"यो वेद वेदवदनं सदनं हि सम्यग्-
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥